योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०२८

श्रीराम उवाच ।

वज्राङ्गसाराद्ब्रह्माण्डकुड्यान्निबिडमण्डलात् ।

कोटियोजनसंपुष्टात्कथं ते निर्गतेऽबले ।। १

श्रीवसिष्ठ उवाच ।

क्व ब्रह्माण्डं क्व तद्भित्तिः क्वात्रासौ वज्रसारता ।

किलावश्यं स्थिते देव्यावन्तःपुरवराम्बरे ।। २

तस्मिन्नेव गिरिग्रामे तस्मिन्नेवालयाम्बरे ।

ब्राह्मणः स वसिष्ठाख्य आस्वादयति राजताम् ।। ३

तमेव मण्डपाकाशकोणकं शून्यमात्रकम् ।

चतुःसमुद्रपर्यन्तं भूतलं सोऽनुभूतवान् ।। ४

आकाशात्मनि भूपीठं तस्मिंस्तद्राजपत्तनम् ।

राजसद्मानुभवति स च सा चाप्यरुन्धती ।। ५

लीलाभिधाना सा जाता तया च ज्ञप्तिरर्चिता ।

ज्ञप्त्या सह समुल्लङ्घ्य खमाश्चर्यमनोहरम्।। ६

प्रादेशमात्रे नभसि सा तत्रैवगृहोदरे।

ब्रह्माण्डान्तरमासाद्य गिरिग्रामकमन्दिरे ।। ७

ब्रह्माण्डात्परिनिर्गत्य स्वगृहे स्थितिमाययौ ।

स्वप्नात्स्वप्नान्तरं प्राप्य यथा तल्पगतः पुमान् ।। ८

प्रतिभामात्रमेवैतत्सर्वमाकाशमात्रकम् ।

न ब्रह्माण्डं न संसारो न कुड्यादि न दूरता ।। ९

स्वचित्तमेव कचति तयोस्तादृङ्मनोहरम् ।
वासनामात्रसोल्लेखं क्व ब्रह्माण्डं क्व संसृतिः ।। १०
निरावरणमेवेदं ज्ञप्त्याकाशमनन्तकम् ।
किंचित्स्वचित्तेनोन्नीतं स्पन्दयुक्त्येव मारुतः ।। ११
चिदाकाशमजं शान्तं सर्वत्रैव हि सर्वदा ।
चित्त्वाज्जगदिवाभाति स्वयमेवात्मनात्मनि ।।
येन बुद्धं तु तस्यैतदाकाशादप शून्यकम् ।
न बुद्धं येन तस्यैतद्वज्रसाराचलोपमम् ।। १३
गृह एव यथा स्वप्ने नगरं भाति भासुरम् ।
तथैतदसदेवान्तश्चिद्धातौ भाति भास्वरम् ।। १४
यथा मरौ जलं बुद्धं कटकत्वं च हेमनि ।
असत्सदिव भातीदं तथा दृश्यत्वमात्मनि ।। १५
एवमाकथयन्त्यौ ते ललने ललिताकृती ।
गृहान्निर्ययतुर्बाह्यं चारुचक्रमणक्रमैः ।। १६
आदृश्ये ग्रामलोकेन प्रेक्षमाणे पुरोगिरिम् ।
चुम्बिताकाशकुहरं संस्पृष्टादित्यमण्डलम् ।। १७
नानावर्णाखिलोत्फुल्लविचित्रवननिर्मलम् ।
नानानिर्झरनिर्ह्रादकूजद्घनविहंगमम् ।। १८
विचित्रमञ्जरीपुञ्जपिञ्जराम्बुदमण्डलम् ।
स्वभ्रमच्छगुलुच्छाग्रविश्रान्तखगसारसम् ।। १९
सारवञ्जुलविस्तारगुप्ताखिलसरित्तटम् ।
असमाप्तशिलाश्वभ्रलतावर्तनमारुतम् ।। २०
पुष्पाग्रपिहिताकाशकोशकुड्यकवारिदम् ।
पतद्दीर्घसरित्स्रोतः स्फुरन्मुक्ताकलापकम् ।। २१
चलद्वृक्षवनव्यूहवातवेल्लिसरित्तटम् ।
नानावनाकुलोपान्तच्छायासततशीतलम् ।। २२

अथ ते ललने तत्र तदा ददृशतुः स्वयम् ।

तं गिरिग्रामकं व्योम्नः स्वर्गखण्डमिव च्युतम् ।। २३

रटत्प्रणालीपटलं पूर्णपुष्करिणीगणम् ।

द्विजैः कुचकुचैः कूजत्स्वलीलाश्वभ्रकच्छकम् ।। २४

गच्छद्गोवृन्दहुंकारकरालाखिलकुञ्जकम् ।

कुञ्जगुल्मकखण्डाढ्यं सच्छायघनशाद्वलम् ।। २०५

दुष्प्रवेशार्ककिरणं दृशन्नीहारधूसरम् ।

उदग्रमञ्जरीपुञ्जजटालं विशिखान्तरम् ।। २६

शिलाकुहरवाःस्फालप्रोच्चलन्मुक्तनिर्झरैः ।

स्मारिताचलनिर्धूतक्षीरोदकजलश्रियम् ।। २७

फलमाल्यमहाभारभासुरैरजिरद्रुमैः ।

आनीय पुष्पसंभारं तिष्ठद्भिरिव संकुलम् ।। २८

तरत्तरङ्गझांकारकारिमारुतकम्पितैः ।

कीर्णपुष्पसमावृष्टं द्रुमैरपि रसाकुलैः ।। २९

अशङ्कितशिलाकूटस्रवदब्बिन्दुटंकृतैः ।

किंचित्कृतरवं गुप्तैरशङ्कैः शङ्कितैः खगैः ।। ३०

उत्फाललहरीश्रान्तसीकरास्वादनाकुलैः ।

नद्यामुडुपरावर्तवृत्तिभिर्विहगैर्वृतम् ।। ३१

उत्तालतालविश्रान्तकाकालोकनशङ्कितैः ।

बालैः प्रगोपितामिक्षाखण्डं जीर्णस्वभुक्तकैः ।। ३२

पुष्पशेखरसंभारवसनग्रामबालकम् ।

खर्जूरनिम्बजम्बीरगहनोपान्तशीतलम् ।। ३३

क्षौमाग्रहस्ताम्बरया मञ्जरीपूर्णकर्णया ।

क्षुत्क्षीणयाक्रान्तरथ्यं ग्रामकीटककान्तया ।। ३४

सरित्तरङ्गसंघट्टसंरावाश्रुतसंकथम् ।

कर्मजाड्यघनत्रासवाञ्छितैकान्तसंस्थितम् ।। ३7५

दधिलिप्तास्यहस्तांसैः स्निग्धपुष्पलताधरैः ।

नग्नैर्गोमयपङ्काङ्कैर्बालैराकुलचत्वरम् ।। ३६

तीरशाद्वलवल्लीनां दोलान्दोलनकारिभिः ।

तरङ्गैर्वाह्यमानस्य लेखिकाङ्कितसैकतम् ।। ३७

दधिक्षीरघनामोदमत्तमन्थरमक्षिकम् ।

कामभुक्तार्थतोद्बाष्पजर्जराबलबालकम् ।। ३८

गोमयासिक्तवलयकरनारीकृतक्रुधम् ।

धम्मिल्लवलनाव्यग्रत्रस्तस्त्रीविहसज्जनम् ।। ३९

दान्तपुष्पच्छदोत्सन्नपतत्ककुदवायसम्।

गृहरथ्यागणद्वारकीर्णक्रूरकुरण्टकम् ।। ४०

गृहपार्श्वस्थितश्वभ्रकुञ्जैः कुसुमितप्रभैः ।

प्रत्यहं प्रातरागुल्फमाकीर्णकुसुमाजिरम् ।। ४१

चरच्चमरसारङ्गजालजङ्गलखण्डकम् ।

गुञ्जानिकुञ्जसंजातशष्पसुप्तमृगार्भकम् ।। ४२

एकान्तसुप्तवत्सैककर्णस्पन्दास्तमक्षिकम् ।

गोपोच्छिष्टीकृतदधिखसृक्किस्पन्दिमक्षिकम् ।। ४३

समस्तसद्मसंक्षीणमक्षिकाक्षिप्तमाक्षिकम् ।

फुल्लाशोकद्रुमोद्यानकृतलाक्षिकमन्दिरम् ।। ४४

सीकरासारमरुता नित्यार्द्रविकचद्रुमम् ।

कदम्बमुकुलप्रोतसमस्तच्छादनतृणम् ।। ४५

प्रतिकृत्तलताफुल्लकेतकोत्करपाण्डुरम्।

वहत्प्राणालपटलीरणद्गुरुगुरारवम् ।। ४६

वातायनगुहानिर्यत्सोधविश्रान्तवारिदम् ।

पूर्णपुष्करिणीपङ्क्तिपूर्णराजपृथूत्तरम् ।। ४७

नीरन्ध्रविटपिच्छायाशीतलामलशाद्वलम् ।

सर्वशष्पाग्रवार्बिन्दुप्रतिबिम्बिततारकम् ।। ४८

अनारतपतत्फुल्लहिमवर्षसितालयम् ।
विचित्रमञ्जरीपुष्पपत्रसत्फलपादपम् ।। ४९
गृहकक्षान्तरालीनमेघसुप्तचिरण्टिकम् ।
सौधस्थमेघविद्युद्भिरनादेयप्रदीपकम् ।। ५०
कन्दरानिलभांकारघनघुंघुममण्डपम् ।
चरच्चकोरहारीतहरिणीहारिमन्दिरम् ।। ५१
उन्निद्रकन्दलोद्भ्रान्तमांसलामोदमन्थरैः ।
मरुद्भिर्मन्दमायातुमारब्धैर्लोलपल्लवम् ।। ५२
लावकालापलीलायामालीनललनागणम् ।
कोककोकिलकाकोलकोलाहलसमाकुलम् ।। ५३
शालतालतमालाब्जनीलतत्फलमालिनम् ।
वल्लीवलयविन्यासविलासवलितद्रुमम् ।। ५४
आलोलपल्लवलतावलितायनाना-
मुत्फुल्लकन्दलशिलीन्ध्रसुगन्धितानाम् ।
तालीतमालदलताण्डवमण्डपाना-
मारामफुल्लकुसुमद्रुमशीतलानाम् ।। ५५
साराववारिचलनाकुलगोकुलाना-
मानीलसस्यकुसुमस्थलशोभितानाम् ।
तीरद्रुमप्रकरगुप्तसरिद्रयाणां
नीरन्ध्रपुष्पितलताग्रवितानकानाम् ।। ५६
उद्यानकुन्दमकरन्दसुगन्धितानां
गन्धान्धषट्पदकुलान्तरिताम्बुजानाम् ।
सौन्दर्यतर्जितपुरन्दरमन्दिराणां
राजीवराजिरजसारुणिताम्बराणाम् ।। ५७
रंहोवहद्गिरिनदीरवघर्घराणां
कुन्दावदातजलदद्युतिभासुराणाम् ।

सौधस्थितोल्लसितफुल्ललतालयानां

लीलावलोलकलकण्ठविहङ्गमानाम् ।। ५८

उल्लासिकौसुमदलास्तरणस्थयूना-

मापादमावलितमाल्यविलासिनीनाम् ।

सर्वत्र सुन्दरनवाङ्कुरदन्तुराणां

शोभोल्लसद्वरलताकुलमार्गणानाम् ।। ५९

संजातकोमललतोत्पलसंकुलानां ।

तिष्ठत्पयोदपटसंवलितालयानाम् ।

नीहारहारहरितस्थलविश्रुतानां

सौधस्थमेघतडिदाकुलिताङ्गनानाम् ।। ६०

नीलोत्पलोल्लसितसौरभसुन्दराणां

हुंकारहारिहीरतोन्मुखगोकुलानाम् ।

विश्रब्धमुग्धमृगसारगृहाजिराणा-

मुन्नृत्यबर्हिघनसीकरनिर्झराणाम् ।। ६१

सौगन्ध्यमत्तपवनाहतविक्लवानां

वप्रौषधिज्वलनविस्मृतदीपकानाम् ।

कोलाहलाकुलकुलायकुलाकुलानां

कुल्याकुलाकलकलाश्रुतसंकथानाम् ।। ६२

मुक्ताफलप्रकरसुन्दरबिन्दुपात-

शीताखिलद्रुमलतातृणपल्लवानाम् ।

लक्ष्मीमनस्तमितपुष्पविकासभाजां

शक्नोति कः कलयितुं गिरिमन्दिराणाम् ।।६३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे लीलोपाख्याने गिरिग्रामवर्णनं नामाष्टाविंशः सर्गः।।28।।